# bhRigu sUtram

# ભૃગુ સૂત્રમ્

## Document Information

Text title : bhRigu sUtram

File name : bhrigusUtram.itx

Category : sUtra, sociology_astrology, jyotisha

Location : doc_z_misc_sociology_astrology

Author : bhRigu muni

Transliterated by : Radu Canahai clradu at yahoo.com

Proofread by : Radu Canahai, Pradeep Date

Latest update : July 6, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 11, 2023

*sanskritdocuments.org*

bhRigu sUtram

# ભૃગુ સૂત્રમ્

## અથ તન્વાદિદ્વાદશ ભાવસ્થિત રવિ ફલમાહ

તત્રાદૌ લગ્ને રવિફલં

આરોગ્યં ભવતિ ॥ ૧॥

પિત્તપ્રકૃતિઃ નેત્રરોગી ॥ ૨॥

મેધાવી સદાચારી વા ॥ ૩॥

ઉષ્ણો દરવાન્ ॥ ૪॥

મૂર્ખઃ પુત્રહીનઃ ॥ ૫॥

તીક્ષ્ણબુદ્ધિઃ ॥ ૬॥

અલ્પભાષી પ્રવાસશીલઃ સુખી ॥ ૭॥

સ્વોચ્ચે કીર્તિમાન્ ॥ ૮॥

બલિનિરીક્ષિતે વિદ્વાન્ ॥ ૯॥

નીચે પ્રતાપવાન્ ॥ ૧૦॥

જ્ઞાનદ્વેષી દરિદ્રઃ અન્ધકઃ ॥ ૧૧॥

શુભદૃષ્ટે ન દોષઃ ॥ ૧૨॥

સિંહે સ્વાંશે નાથઃ ॥ ૧૩॥

કુલીરે જ્ઞાનવાન્ ॥ ૧૪॥

રોગી બુદબુદાક્ષહ્ઃ ॥ ૧૫॥

મકરો હૃદ્રોગી ॥ ૧૬॥

મીને સ્ત્રીજનસેવી ॥ ૧૭॥

કન્યાયાં રવૌ કન્યાપ્રજઃ દારહીનઃ કૃતઘ્નઃ ॥ ૧૮॥

ક્ષેત્રી શુભયુક્તહઃ આરોગ્યવાન્ ॥ ૧૯॥

પાપયુતે શત્રુનીચક્ષેત્રે તૃતીયે વર્ષે જ્વરપીડા ॥ ૨૦॥

શુભદૃષ્ટે ન દોષઃ ॥ ૨૧॥

લગ્નાદ્વિતીયે રવિફલં

મુખરોગી ॥ ૨૨॥

પઞ્ચવિંશતિવર્ષે રાજદણ્ડેન દ્રવ્યચ્છેદઃ ॥ ૨૩॥

ઉચ્ચે સ્વક્ષેત્રે ન દોષઃ ॥ ૨૪॥

પાપયુતે નેત્રરોગી ॥ ૨૫॥

સ્વલ્પવિદ્વાન્ રોગી ॥ ૨૬॥

શુભવીક્ષિતે ધનવાન્ દોષાદીન્ વ્યપહરતી ॥ ૨૭॥

નેત્રસૌખ્યમ્ ॥ ૨૮॥

સ્વોચ્ચે સ્વક્ષેત્રે વા બહુધનવાન્ ॥ ૨૯॥

બુધયુતે પવનવાક્ ॥ ૩૦॥

ધનાધિપઃસ્વોચ્ચે વાગ્મી ॥ ૩૧॥

શાસ્ત્રજ્ઞઃ જ્ઞાનવાન્ નેત્રસૌખ્યં રાજયોગશ્ચ ॥ ૩૨॥

લગ્નાતૃતીયે રવિફલં

બુદ્ધિમાન્ અનુજરહિતઃ જ્યેષ્ઠનાશઃ ॥ ૩૩॥

પઞ્ચમે વર્ષે ચતુરષ્ટ દ્વાદશવર્ષે વા કિઞ્ચિત્પીડા ॥ ૩૪॥

પાપયુતે ક્રૂરકર્તા ॥ ૩૫॥

દ્વિભ્રાતૃમાન્ પરાક્રમી ॥ ૩૬॥

યુદ્ધે શૂરશ્ચ ॥ ૩૭॥

કીર્તિમાન્ નિજધનભોગી ॥ ૩૮॥

શુભયુતે સોદર વૃદ્ધિઃ ॥ ૩૯॥

ભાવાધિપે બલયુતે ભ્રાતૃદીર્ઘાયુઃ ॥ ૪૦॥

પાપયુતે પાપેક્ષણવંશાન્નાશઃ ॥ ૪૧॥

શુભવીક્ષણવશાદ્ધનવાન્ ભોગી સુખીચ ॥ ૪૨॥

લગ્નાચ્ચતુર્થે રવિફલં

હીનાઙ્ગઃ અહઙ્કારી જનવિરોધી ઉષ્ણદેહી મનઃ પીડાવાન્ ॥ ૪૩॥

દ્વાત્રિંશદ્વર્ષે સર્વકર્માનુકૂલવાન્ ॥ ૪૪॥

બહુપ્રતિષ્ઠાસિદ્ધિઃ સત્તાપદવી જ્ઞાનશૌર્ય સમ્પન્નઃ ॥ ૪૫॥

ધનધાન્યહીનઃ ॥ ૪૬॥

ભાવાધિપે બલયુતે સ્વક્ષેત્રત્રિકોણે કેન્દ્રે લક્ષણાપેક્ષયા
આન્દોલિકાપ્રાપ્તિઃ ॥ ૪૭॥

પાપયુતે પાપવિક્ષણવશાદ્દુષ્ટસ્થાને દુર્વાહનસિદ્ધિઃ ॥ ૪૮॥

ક્ષેત્રહીનઃ ॥ ૪૯॥

પરગૃહ એવ વાસઃ ॥ ૫૦॥

લગ્નાત્પઞ્ચમે રવિફલં

નિર્ધનઃ સ્થૂલદેહી સપ્તમે વર્ષે પિત્રારિષ્ટવાન્ ॥ ૫૧॥

મેધાવી અલ્પ પુત્રઃ બુદ્ધિમાન્ ॥ ૫૨॥

ભાવાધિપે બલયુતે પુત્રસિદ્ધિઃ ॥ ૫૩॥

રાહુકેતુયુતે સર્પશાપાત્ સુતક્ષયઃ ॥ ૫૪॥

કુજયુતે શત્રુયુતે મૂલાત્ ॥ ૫૫॥

શુભદૃષ્ટયુતે ન દોષઃ ॥ ૫૬॥

સૂર્યશરભાદિષુ ભક્તઃ ॥ ૫૭॥

બલયુતે પુત્રસમૃદ્ધિઃ ॥ ૫૮॥

લગ્નાત્ષષ્ઠે રવિફલં

અલ્પજ્ઞાતિઃ ॥ ૫૯॥

શત્રુવૃદ્ધિઃ ધનધાન્યસમૃદ્ધિઃ ॥ ૬૦॥

વિંશતિવર્ષે નેત્ર વૈપરીત્યં ભવતિ ॥ ૬૧॥

શુભદૃષ્ટયુતે ન દોષઃ ॥ ૬૨॥

અહિકાનન પારકૃન્મન્ત્રસેવી ॥ ૬૩॥

કીર્તિમાન્ શોકરોગી મહોષ્ણદેહી ॥ ૬૪॥

શુભયુતે ભાવાધિપે દેહારોગ્યમ્ ॥ ૬૫॥

જ્ઞાતિશત્રુબાહુલ્યમ્ ॥ ૬૬॥

ભાવાધિપે દુર્બલે શત્રુનાશઃ ॥ ૬૭॥

પિતૃદુર્બલઃ ॥ ૬૮॥

લગ્નાત્સપ્તમે રવિફલં

વિવાહવિલમ્બનં સ્ત્રીદ્વેષી પરદારરતઃ દારદ્વયવાન્ ॥ ૬૯॥

પઞ્ચવિંશતિવર્ષે દેશાન્તર પ્રવેશઃ ॥ ૭૦॥

અભક્ષ્ય ભક્ષણઃ વિનોદશીલઃ દારદ્વેષી ॥ ૭૧॥

નાશાન્તબુદ્ધિઃ ॥ ૭૨॥

સ્વર્ક્ષેબલવતિ એકદારવાન્ ॥ ૭૩॥

શત્રુનીચવીક્ષિતે પાપયુતે વીક્ષણૈર્બહુદારવાન્ ॥ ૭૪॥

લગ્નાદષ્ટમે રવિફલં

અલ્પપુત્રઃ નેત્રરોગી ॥ ૭૫॥

દશમે વર્ષે શિરોવ્રણી ॥ ૭૬॥

શુભયુતદૃષ્ટે તત્પરિહારઃ ॥ ૭૭॥

અલ્પધનવાન્ ગોમહિષ્યાદિનાશઃ ॥ ૭૮॥

દેહે રોગઃ ॥ ૭૯॥

ખ્યાતિમાન્ ॥ ૮૦॥

ભાવાધિપે બલયુતે ઇષ્ટક્ષેત્રવાન્ ॥ ૮૧॥

સ્વોચ્ચેસ્વક્ષેત્રે દીર્ઘાયુઃ ॥ ૮૨॥

લગ્નાન્નવમે રવિફલં

સૂર્યાદિદેવતાભક્તઃ ॥ ૮૩॥

ધાર્મિકઃ અલ્પભાગ્યઃ પિતૃદ્વેષી સુતદારવાન્
સ્વોચ્ચે સ્વક્ષેત્રે તસ્ય પિતા દીર્ઘાયુઃ ॥ ૮૪॥

બહુધનવાન્ તપોધ્યાનશીલઃ ગુરૂદેવતાભક્તઃ ॥ ૮૫॥

નીચારિપાપક્ષેત્રે પાપૈર્યુતે દૃષ્ટે વા પિતૃનાશઃ ॥ ૮૬॥

શુભયુતે વીક્ષણવશાદ્ વા પિતા દિર્ઘાયુઃ ॥ ૮૭॥

લગ્નાદ્દશમે રવિફલં

અષ્ટાદશવર્ષે વિદ્યાદિકારેણ પ્રસિદ્ધો ભવતિ
દ્રવ્યાર્જનસમર્થશ્ચ ॥ ૮૮॥

દૃષ્ટત્રિતઃ રાજપ્રિયઃ સત્કર્મરતઃ રાજશૂરઃ ખ્યાતિમાન્ ॥ ૮૯॥

સ્વોચ્ચે સ્વક્ષેત્રે બલ પરઃ ॥ ૯૦॥

કીર્તિપ્રસિદ્ધિઃ ॥ ૯૧॥

તટાકક્ષેત્રગોપુરાદિબ્રાહ્મણ પ્રતિષ્ઠાસિદ્ધિઃ ॥ ૯૨॥

પાપક્ષેત્રે પાપયુતે પાપદૃષ્ટવશાત્ કર્મવિઘ્નકરઃ ॥ ૯૩॥

દુષ્ટકૃતિઃ ॥ ૯૪॥

અનાચારઃ દુષ્કર્મકૃત્પાપી ॥ ૯૫॥

લગ્નાદેકાદશે રવિફલં

બહુધાન્યવાન્ પઞ્ચવિંશતિવર્ષે વાહનસિદ્ધિઃ ॥ ૯૬॥

ધનવાગ્જાલદ્રવ્યાર્જનસમર્થઃ પ્રભુ જ્વરિતભૃત્યજનસ્નેહઃ ॥ ૯૭॥

પાપયુતે બહુધાન્યવ્યયઃ ॥ ૯૮॥

વાહનહીનઃ ॥ ૯૯॥

સ્વક્ષેત્રે સ્વોચ્ચે અધિકપ્રાબલ્યમ્ ॥ ૧૦૦॥

વાહનેશયુતે બહુક્ષેત્રે વિત્તાધિકારઃ ॥ ૧૦૧॥

વાહનયોગેન બહુભાગ્યવાન્ ॥ ૧૦૨॥

લગ્નાદ્દ્વાદશે રવિફલં

ષટ્ત્રિંશદ્વર્ષે ગુલ્મરોગી ॥ ૧૦૩॥

અપાત્રવ્યયકારી પતિતઃ ધનહાનિઃ ॥ ૧૦૪॥

ગોહત્યાદોષકૃત્ પરદેશવાસી ॥ ૧૦૫॥

ભાવાધિપે બલયુતે વા દેવતાસિદ્ધિઃ ॥ ૧૦૬॥

શય્યાખટ્વઙ્ગાદિ સૌખ્યમ્ ॥ ૧૦૭॥

પાપયુતે અપાત્રવ્યયકારી સુખશય્યાહીનઃ ॥ ૧૦૮॥

ષષ્ઠેશયુતે કુષ્ઠરોગયુતઃ શુભદૃષ્ટિયુતે નિવૃત્તિઃ ॥ ૧૦૯॥

પાપી રોગવૃદ્ધિમાન્ ॥ ૧૧૦॥

## અથ તન્વાદિદ્વાદશભાવસ્થિતચન્દ્રફલમાહ

તત્રાદૌ લગ્ને ચન્દ્રફલં

રૂપલાવણ્યયુક્તશ્ચપલઃ વ્યાધિના જલાચ્ચસૌખ્યઃ ॥ ૧॥

પઞ્ચદશવર્ષે બહુયાત્રાવાન્ ॥ ૨॥

મેષવૃષભકર્કલગ્ને ચન્દ્રેશાસ્ત્ર પરઃ ॥ ૩॥

ધની સુખી નૃપાલઃ મૃદુવાક્ બુદ્ધિરહિતઃ મૃદુગાત્રઃ બલી ॥ ૪॥

શુભદૃષ્ટે બલવાન્ ॥ ૫॥

બુદ્ધિમાન્ આરોગ્યવાન્ વાગ્જાલકઃ ધની ॥ ૬॥

લગ્નેશે બલરહિતે વ્યાધિમાન્ ॥ ૭॥

શુભદૃષ્ટે આરોગ્યવાન્ ॥ ૮॥

લગ્નાદ્વિતીયે ચન્દ્રફલં

શોભનવાન્ બહુપ્રતાપી ધનવાન અલ્પસન્તોષી ॥ ૯॥

અષ્ટાદશવર્ષે રાજદ્વરેણ સેનાધિપત્યોગઃ ॥ ૧૦॥

પાપયુતેવિદ્યાહીનઃ ॥ ૧૧॥

શુભયુતે બહુવિદ્યાધનવાન્ ॥ ૧૨॥

એકેનૈવપૂર્ણચન્દ્રેણ સમ્પૂર્ણધનવાન્ ॥ ૧૩॥

અનેક વિદ્યાવાન્ ॥ ૧૪॥

લગ્નાદ્તૃતીયે ચન્દ્રફલં

ભગિનીસામાન્યઃ વાતશરીરી અન્નહીનઃ અલ્પભાગ્યઃ ॥ ૧૫॥

ચતુર્વિંશતિવર્ષે ભાવિરુપેન રાજદણ્ડેન દ્રવ્યચ્છેદઃ ॥ ૧૬॥

ગોમહિષ્યાદિહીનઃ ॥ ૧૭॥

પિશુનઃ મેધાવી સહોદર વૃદ્ધિ ॥ ૧૮॥

લગ્નાચ્ચતુર્થે ચન્દ્રફલં

રાજ્યાભિષિક્તઃ અશ્વવાન્ ક્ષીરસમૃદ્ધિઃ ધનધાન્યસમૃદ્ધિઃ
માતૃરોગી ॥ ૧૯॥

પરસ્ત્રીસ્તનપાનકારી ॥ ૨૦॥

મિષ્ઠાન્નસમ્પન્નઃ પરસ્ત્રીલોલઃ સૌખ્યવાન્ ॥ ૨૧॥

પૂર્ણચન્દ્રં સ્વક્ષેત્રે બલવાન્ માતૃદીર્ઘાયુઃ ક્ષીણચન્દ્રે પાપયુતે
માતૃનાશઃ ॥ ૨૨॥

વાહનહીનઃ બલયુતે વાહનસિદ્ધિઃ ॥ ૨૩॥

ભાવાધિપે સ્વોચ્ચે અનેકાશ્વાદિવાહનસિદ્ધિઃ ॥ ૨૪॥

લગ્નાત્પઞ્ચમે ચન્દ્રફલં

સ્ત્રીદેવતાસિદ્ધિઃ ભાર્યારૂપવતી ॥ ૨૫॥

ક્વચિત્ કોપવતી ॥ ૨૬॥

સ્તનમધ્યેલાઞ્છનં ભવતિ ॥ ૨૭॥

ચતુષ્પાદલાભઃ સ્ત્રીદ્વયં બહુક્ષીરલાભઃ સત્ત્વયુતઃ
બહુશ્રમોત્પન્નઃ ચિન્તાવાન્ સ્ત્રીપ્રજાવાન્ એકપુત્રવાન્ ॥ ૨૮॥

સ્ત્રીદેવતોપાસનાવાન્ ॥ ૨૯॥

શુભયુતે વીક્ષણવશાદનુગ્રહસમર્થઃ ॥ ૩૦॥

પાપયુતેક્ષણવશાન્નિગ્રહસમર્થઃ ॥ ૩૧॥

પૂર્ણચન્દ્રે બલવાન્ અન્નદાનપ્રીતિઃ અનેકબુધપ્રસાદૈશ્વર્યસમ્પન્નઃ
સત્કર્મકૃત્ ભાગ્યસમૃદ્ધિઃ રાજયોગી જ્ઞાનવાન્ ॥ ૩૨॥

લગ્નાત્ષષ્ઠે ચન્દ્રફલં

અધિકદારિદ્ર્યદેહી ॥ ૩૩॥

ષટ્ત્રિંશદ્વર્ષે વિધવાસઙ્ગમી તત્ર પાપયુતે હીનપાપકરઃ ॥ ૩૪॥

રાહુકેતુયુતે અર્થહીનઃ ॥ ૩૫॥

ઘોરઃ શત્રુકલહવાન્ સહોદરહીન અગ્નિમાન્દદિરોગી ॥ ૩૬॥
તટાકકૂપાદિષુ જલાદિગણ્ડઃ ॥ ૩૭॥

પાપયુતે રોગવાન્ ॥ ૩૮॥

ક્ષીણચન્દ્રે પુર્ણફલાનિ ॥ ૩૯॥

શુભયુતે બલવાન્ અરોગી ॥ ૪૦॥

લગ્નાત્સપ્તમે ચન્દ્રફલં

મૃદુભાષી પાર્શ્વનેત્રઃ દ્વાત્રિંશદ્વર્ષે સ્ત્રીયુક્તઃ ॥ ૪૧॥

સ્ત્રીલોલઃ સ્ત્રીમૂલેન ગ્રન્થિશસ્ત્રાદિપીડા ॥ ૪૨॥

રાજપ્રસાદલાભઃ ॥ ૪૩॥

ભાવાધિપે બલયુતે સ્ત્રીદ્વયમ્ ॥ ૪૪॥

ક્ષીણચન્દ્રે કલત્રનાશઃ પૂર્ણચન્દ્રે બલયુતે
સ્વોચ્ચે એકદારવાન્ ॥ ૪૫॥

ભોગલુબ્ધઃ ॥ ૪૬॥

લગ્નાદષ્ટમે ચન્દ્રફલં

અલ્પવાહનવાન્ ॥ ૪૭॥

તડાકાદિષુગણ્ડઃ ॥ ૪૮॥

સ્ત્રીમૂલેનબન્ધુજન પરિત્યાગી ॥ ૪૯॥

સ્વર્ક્ષે સ્વોચ્ચે દીર્ઘાયુઃ ક્ષીણે વા મધ્યમાયુઃ ॥ ૫૦॥

લગ્નાન્નવમે ચન્દ્રફલં

બહુશ્રુતવાન્ પુણ્યવાન્ ॥ ૫૧॥

તટાકગોપુરાદિનિર્માણ પુણ્યકર્તા ॥ ૫૨॥

પુત્રભાગ્યવાન્ ॥ ૫૩॥

પૂર્ણચન્દ્રે બલયુતે બહુભાગ્યવાન્ ॥ ૫૪॥

પિતૃદીર્ઘયુઃ ॥ ૫૫॥

પાપયુતે પાપક્ષેત્રે ભાગ્યહીનઃ ॥ ૫૬॥

નષ્ટપિતૃમાતૃકઃ ॥ ૫૭॥

લગ્નાદ્દશમે ચન્દ્રફલં

વિદ્યાવાન્ ॥ ૫૮॥

પાપયુતે સપ્તવિંશતિવર્ષે વિધવાસઙ્ગમેન જનવિરોધી ॥ ૫૯॥

અતિમેધાવી ॥ ૬૦॥

સત્યકર્મનિરતઃ કીર્તિમાન્ દયાવાન્ ॥ ૬૧॥

ભાવાધિપે બલયુતે વિશેસત્કર્મસિદ્ધિઃ ॥ ૬૨॥

પાપનિરિક્ષિતે પાપયુતે વા દુષ્કૃતિઃ ॥ ૬૩॥

કર્મવિઘ્નકરઃ ॥ ૬૪॥

લગ્નાદેકાદશે ચન્દ્રફલં

બહુશ્રુતવાન્ પુત્રવાન્ ઉપકારિ ॥ ૬૫॥

પઞ્ચાદશવર્ષેપુત્રર્ણબહુપ્રાબલ્યયોગઃ ॥ ૬૬॥

ગુણાઢ્યઃ ॥ ૬૭॥

ભાવાધિપે બલહીને બહુધન વ્યયઃ ॥ ૬૮॥

બલયુતે લાભવાન્ ॥ ૬૯॥

લાભેચન્દ્રે નિક્ષેપલાભઃ ॥ ૭૦॥

શુક્રયુતેન નરવાહન યોગ ॥ ૭૧॥

બહુવિદ્યાવાન્ ॥ ૭૨॥

ક્ષેત્રવાન્ અનેકજનરક્ષણભાગ્યવાન્ ॥ ૭૩॥

લગ્નાદ્દ્વાદશે ચન્દ્રફલં

દુર્ભોજનઃ દુષ્પાત્રવ્યયઃ કોપોદ્ભવવ્યસન સમૃદ્ધિમાન્
સ્ત્રીયોગયુક્તઃ અન્ન હીનઃ ॥ ૭૪॥

શુભયુતે વિદ્વાન્ દયાવાન્ પાપશત્રુયુતે-
-પાપલોકઃશુભમિત્રયુતે શ્રેષ્ઠલોકવાન્ ॥ ૭૫॥

અથ તન્વાદિદ્વાદશભાવસ્થિત ભૌમફલં

તત્રાદૌ લગ્ને ભૌમફલં

દેહે વ્રણં ભવતિ ॥ ૧॥

દૃઢગાત્રઃ ચૌરબુભૂષકઃ બૃહન્નાભિ રક્તપાણિઃ
ક્રૂરો બલવાન્ મૂર્ખઃ કોપવાન્ સભાનશૌર્ય ધનવાન્
ચાપલવાન્ ચિત્તરોગી ક્રોધી દુર્જનઃ ॥ ૨॥

સ્વોચ્ચે સ્વક્ષેત્રે આરોગ્યં દૃઢ્ગાત્રવાન્ રાજસન્માન કીર્તિઃ ॥ ૩॥

દીર્ઘાયુઃ ॥ ૪॥

પાપશત્રુયુતે અલ્પાયુ ॥ ૫॥

સ્વલ્પપુત્રવાન્ વાતશૂલાદિરોગઃ દુર્મુખઃ ॥ ૬॥

સ્વોચ્ચે લગ્નર્ક્ષ ધનવાન્ ॥ ૭॥

વિદ્યાવાન્ નેત્રવિલાસવાન્ ॥ ૮॥

તત્ર પાપયુતે પાપક્ષેત્રે પાપદૃષ્ટિયુતે નેત્ર રોગઃ ॥ ૯॥

લગ્નાદ્વિતીયે ભૌમફલં

વિદ્યાહીનઃ લાભવાન્ ॥ ૧૦॥

પષ્ઠાધિપેનયુતઃ તિષ્ઠતિ ચેન્નેત્રવૈપરીત્યં ભવતિ ॥ ૧૧॥

શુભદૃષ્ટે પરિહારઃ ॥ ૧૨॥

સ્વોચ્ચે સ્વક્ષેત્રે વિદ્યાવાન્ ॥ ૧૩॥

નેત્ર વિલાસઃ ॥ ૧૪॥

તત્ર પાપયુતેક્ષેત્રે પાપદૃષ્ટે નેત્રરોગઃ ॥ ૧૫॥

લગ્નાત્તૃતીયે ભૌમફલં

સ્વસ્ત્રી વ્યભિચારિણી ॥ ૧૬॥

શુભદૃષ્ટે ન દોષ અનુજહીનઃ ॥ ૧૭॥

દ્રવ્યલાભઃ ॥ ૧૮॥

રાહુકેતુયુતે વેશ્યાસઙ્ગમઃ ॥ ૧૯॥

ભ્રાતૃદ્વેષી ક્લેશયુતઃ શુભગઃ ॥ ૨૦॥

અલ્પસહોદરઃ ॥ ૨૧॥

પાપયુતે પાપવીક્ષણેન ભ્રાતૃનાશઃ ॥ ૨૨॥

ઉચ્ચસ્વક્ષેત્રે શુભયુતે ભ્રાતા દીર્ઘાયુઃ ધૈર્યવિક્રમવાન્ ॥ ૨૩॥

યુદ્ધે શૂરઃ ॥ ૨૪॥

પાપયુતે મિત્રક્ષેત્રે ધૃતિમાન્ ॥ ૨૫॥

લગ્નાચ્ચતુર્થે ભૌમફલં

ગ્રહચ્છિદ્રમ્ ॥ ૨૬॥

અષ્ટમે વર્ષે પિત્રારિષ્ટં માતૃરોગી ॥ ૨૭॥

સૌમ્યયુતે પરગૃહવાસઃ ॥ ૨૮॥

નિરોગશરીરી ક્ષેત્રહીનઃ ધનધાન્યહીનઃ જીર્ણગૃહવાસઃ ॥ ૨૯॥

ઉચ્ચે સ્વક્ષેત્રે શુભયુતે મિત્રક્ષેત્રે
વાહનવાન્ ક્ષેત્રવાન્ માતૃદીર્ઘાયુઃ ॥ ૩૦॥

નીચર્ક્ષે પાપમૃત્યુયુતે માતૃનાશઃ ॥ ૩૧॥

સૌમ્યયુતે વાહન નિષ્ઠાવાન્ ॥ ૩૨॥

બન્ધુજનદ્વેષી સ્વદેશપરિત્યાગી વસ્ત્રહીનઃ ॥ ૩૩॥

લગ્નાત્પઞ્ચમે ભૌમફલં

નિર્ધનઃ પુત્રાભાવઃ દુર્માર્ગી રાજકોપઃ ॥ ૩૪॥

ષષ્ઠવર્ષે આયુધેન કિઞ્ચિદણ્ડકાલઃ ॥ ૩૫॥

દુર્વાસન જ્ઞાનશીલવાન્ ॥ ૩૬॥

માયાવાદી ॥ ૩૭॥

તીક્ષ્ણધીઃ ॥ ૩૮॥

ઉચ્ચે સ્વક્ષેત્રે પુત્રસમૃદ્ધિઃ અન્નદાનપ્રિયઃ ॥ ૩૯॥

રાજાધિકારયોગઃ શત્રુપીડા ॥ ૪૦॥

પાપયુતે પાપક્ષેત્રે પુત્રનાશઃ ॥ ૪૧॥

બુદ્ધિ ભ્રંશાદિરોગઃ ॥ ૪૨॥

રન્ધ્રેશે પાપયુતે પાપી ॥ ૪૩॥

વીરઃ ॥ ૪૪॥

દત્ત પુત્ર યોગઃ ॥ ૪૫॥

લગ્નાત્ષષ્ઠે ભૌમફલં

પ્રસિદ્ધઃ ॥ ૪૬॥

કાર્યસમર્થઃ ॥ ૪૭॥

શત્રુહન્તા પુત્રવાન્ સપ્તવિંશતિ વર્ષે કન્યકાશ્વાદિ યુત ઊઢવાન્ ॥ ૪૮॥

શત્રુક્ષયઃ ॥ ૪૯॥

પાપર્ક્ષે પાપયુતે પૂર્ણફલાનિ ॥ ૫૦॥

વાતશૂલાદિરોગઃ ॥ ૫૧॥

બુધક્ષેત્ર યુતે કુષ્ઠરોગઃ ॥ ૫૨॥

શુભદૃષ્ટે પરિહારઃ ॥ ૫૩॥

લગ્નાત્સપ્તમે ભૌમફલં

સ્વદાર પીડા ॥ ૫૪॥

પાપાર્તે પાપયુતેન ચ સ્વર્ક્ષે સ્વદાર હાનિઃ ॥ ૫૫॥

શુભયુતે જીવતિ પત્યૌ સ્ત્રીનાશઃ ॥ ૫૬॥

વિદેશપરઃ ॥ ૫૭॥

ઉચ્ચમિત્ર સ્વક્ષેત્ર શુભયુતે પાપક્ષેત્રે ઈક્ષણવશાત્કલત્ર
નાશઃ ॥ ૫૮॥

અથવા ચોરવ્યભિચાર મૂલેન કલત્રાન્તરં દુષ્ટસ્ત્રીસઙ્ગઃ ॥ ૫૯॥

ભગચુમ્બનવાન ॥ ૬૦॥

ચતુષ્પાદ મૈથુનવાન્ મદ્યપાનાપ્રિયઃ ॥ ૬૧॥

મન્દયુતે દૃષ્ટે શિશ્નચુમ્બન પરઃ ॥ ૬૨॥

કેતુયુતે રજસ્વલા સ્ત્રી સમ્ભોગી ॥ ૬૩॥

તત્રશત્રુયુતે બહુકલત્ર-નાશઃ ॥ ૬૪॥

અવીરઃ અહઙ્કારી વા શુભદૃષ્ટે ન દોષઃ ॥ ૬૫॥

લગ્નાદષ્ટમે ભૌમફલં

નેત્રરોગી અર્ધાયુઃ પિત્રારિષ્ટં મૂત્રકૃચ્છ્રરોગઃ ॥ ૬૬॥

અલ્પપુત્રવાન્ વાતશૂલાદિરોગઃ દારસુખયુતઃ ॥ ૬૭॥

શુભયુતે દેહારોગ્યં દીર્ઘાયુ મુનષ્યાદિ વૃદ્ધિઃ ॥ ૬૮॥

પાપક્ષેત્રે પાપયુતે ઈક્ષણવશાદ્ વાતક્ષયાદિરોગઃ
મુત્રકૃચ્છ્રધિક્યં વા ॥ ૬૯॥

મધ્યમાયુઃ ॥ ૭૦॥

ભાવાધિપબલયુતે પૂર્ણાયુઃ ॥ ૭૧॥

લગ્નાન્નવમે ભૌમફલં

પિત્રારિષ્ટમ્ ॥ ૭૨॥

ભાગ્યહીનઃ ॥ ૭૩॥

ઉચ્ચસ્વક્ષેત્રે ગુરુદારગઃ ॥ ૭૪॥

લગ્નાદ્દશમે ભૌમફલં

જનવલ્લભઃ ॥ ૭૫॥

ભાવાધિપે બલયુતે ભ્રાતા દીર્ઘાયુઃ ॥ ૭૬॥

વિશેષ ભાગ્યવાન્ ધ્યાનશીલવાન્ ગુરુભક્તિ યુતઃ ॥ ૭૭॥

પાપયુતે કર્મવિઘ્નવાન્ ॥ ૭૮॥

શુભયુતે શુભક્ષેત્રે કર્મસિદ્ધિઃ ॥ ૭૯॥

કીર્તિપ્રતિષ્ઠાવાન્ અષ્ટાદશવર્ષે દ્રવ્યાર્જન સમર્થઃ ॥ ૮૦॥

સર્વસમર્થઃ દૃઢગાત્ર ચોરબુદ્ધિઃ પાપયુતે
પાપક્ષેત્રે કર્મવિઘ્નકરઃ ॥ ૮૧॥

દુષ્કૃતિઃ ॥ ૮૨॥

ભાગ્યેશ કર્મેશયુતે મહારાજયૌવરાજ્યે પટ્ટભિષેકવાન્ ॥ ૮૩॥

ગુરુયુતે ગજાન્તૈશ્વર્યવાન્ ॥ ૮૪॥

ભૂસમૃદ્ધિમાન્ ॥ ૮૫॥

લગ્નાદેકાદશે ભૌમફલં

બહુકૃત્યવાન્ ધની સ્વગુણે રાશુલાભવાન્ ॥ ૮૬॥

ક્ષેત્રેશયુતે રાજાધિપત્યવાન્ ॥ ૮૭॥

શુભદ્વયયુતે માહારાજાધિપત્યયોગઃ ॥ ૮૮॥

ભ્રાતૃવિત્તવાન્ ॥ ૮૯॥

લગ્નાદ્દ્વાદશે ભૌમફલં

દ્રવ્યાભાવઃ વાતપિત્તદેહઃ ॥ ૯૦॥

પાપયુતે દામ્ભિકઃ ॥ ૯૧॥

## અથ તન્વાદિ દ્વાદશ ભાવસ્થિત બુધફલમાહ

તત્રાદૌ લગ્ને બુધફલં

વિદ્યાવાન્ વિવાહાદિબહુશ્રુતવાન્ ॥ ૧॥

અનેકદેશે સાર્વભૌમઃ મન્ત્રવાદી પિશાચોચ્ચાટન
સમર્થઃ મૃદુભાષી વિદ્વાન્ ક્ષમીદયાવાન્ ॥ ૨॥

સપ્તવિંશતિવર્ષે તીર્થયાત્રાયોગઃ બહુલાભવાન્ બહુવિદ્યાવાન્ ॥ ૩॥

પાપયુતે પાપક્ષેત્રે દેહેરોગઃ પિત્તપાણ્ડુરોગઃ ॥ ૪॥

શુભયુતે શુભક્ષેત્રે દેહારોગ્યમ્ ॥ ૫॥

સ્વર્ણકાન્તિદેહઃ જ્યોતિષશાસ્ત્ર પઠિતઃ
અઙ્ગહીનઃ સજ્જનદ્વેષી નેત્રરોગી ॥ ૬॥

સપ્તદશવર્ષે ભ્રાતૃણામન્યોન્યકલહઃ ॥ ૭॥

વઞ્ચકઃ ॥ ૮॥

ઉચ્ચસ્વક્ષેત્રે ભ્રાતૃસૌખ્યમ્ ॥ ૯॥

શ્રેષ્ઠલોકં ગમિષ્યતિ ॥ ૧૦ ॥

પાપયુતે પાપદૃષ્ટયુતે નીચર્ક્ષે પાપલોકં ગમિષ્યતિ ॥ ૧૧ ॥

શય્યાસુખવર્જિતઃ ક્ષુદ્રદેવતોપાસકઃ ॥ ૧૨ ॥

પાપમન્દાદિયુતે વામનેત્રે હાનિઃ
ષષ્ઠેશયુતે નીચેશયુતે વા ન દોષઃ ॥ ૧૩ ॥

અપાત્રવ્યયવાન્ ॥ ૧૪ ॥

પાપહા ॥ ૧૫ ॥

શુભયુતે નિશ્ચયેન ધનધાન્યાદિમાન્ ધાર્મિક બુદ્ધિઃ ॥ ૧૬ ॥

અસ્ત્રવિત્ ગણિતશાસ્ત્રજ્ઞઃ સૌખ્યવાન્ તર્કશાસ્ત્રવિદ્દૃઢગાત્રઃ ॥ ૧૭ ॥

લગ્નાદ્દ્વિતીયે બુધફલં

પુત્ર સમૃદ્ધિઃ વાચાલકઃ વેદશાસ્ત્રવિચક્ષણઃ
સઙ્કલ્પસિદ્ધ્યા સંયુતઃ ધની ગુણાઢ્યઃ સદ્ગુણી
પઞ્ચદશવર્ષે બહુવિદ્યાવાન્ ॥ ૧૮ ॥

બહુલાભપ્રદઃ ॥ ૧૯ ॥

પાપયુતે પાપક્ષેત્રે અરિનીચગે વિદ્યાવિહીનઃ ॥ ૨૦ ॥

ક્રૂરત્વવાન્ પવનવ્યાધિઃ ॥ ૨૧ ॥

શુભયુતિ વીક્ષણાદ્ધની ॥ ૨૨ ॥

વિદ્યાવાન્ ॥ ૨૩ ॥

ગુરુણા યુતે વીક્ષિતે વા ગણિતશાસ્ત્રાધિકારેણ સમ્પન્નઃ ॥ ૨૪ ॥

લગ્નાત્તૃતીયે બુધફલં

ભ્રાતૃમાન્ બહુસૌખ્યવાન્ ॥ ૨૫ ॥

પઞ્ચદશવર્ષે ક્ષેત્રપુત્રયુતઃ ॥ ૨૬ ॥

ધનલાભવાન્ ॥ ૨૭ ॥

સદ્ગુણશાલી ॥ ૨૮ ॥

ભાવાધિપે બલયુતે દીર્ઘાયુઃ ધૈર્યવાન્ ॥ ૨૯ ॥

ભાવાધિપે ભ્રાતૃપીડા ભીતિમાન્ ॥ ૩૦॥

બલયુતે ભ્રાતા દીર્ઘાયુઃ ॥ ૩૧॥

લગ્નાચ્ચતુર્થે બુધફલં

હસ્તચાપલ્યવાન્ ધૈર્યવાન્ વિશાલાક્ષઃ પિતૃમાતૃસૌખ્યયુતઃ ॥ ૩૨॥

જ્ઞાનવાન્ સુખી ॥ ૩૩॥

ષોડશવર્ષે દ્રવ્યાપહારરૂપેણ અનેક વાહનવાન્ ॥ ૩૪॥

ભાવાધિપે બલયુતે આન્દોલિકા પ્રાપ્તિઃ ॥ ૩૫॥

રાહુકેતુશનિયુતે વાહનારિષ્ટવાન્ ॥ ૩૬॥

ક્ષેત્રસુખવર્જિતઃ બન્ધુકુલદ્વેષી કપટી ॥ ૩૭॥

લગ્નાત્પઞ્ચમે બુધફલં

માતુલગણ્ડઃ માત્રાદિસૌખ્યમ્પુત્ર વિદ્વમેધાવી
મધુરભાષી બુદ્ધિમાન્ ॥ ૩૮॥

ભાવાધિપે પાપયુતે બલહીને પુત્રનાશઃ ॥ ૩૯॥

અપુત્ર દત્તપુત્રપ્રાપ્તિઃ પાપકર્મી મન્ત્રવાદી ॥ ૪૦॥

લગ્નાત્ષષ્ઠે બુધફલં

રાજપૂજ્યઃ વિદ્યાવિઘ્નઃ દામ્ભિકઃ વિવાદશૂરઃ ॥ ૪૧॥

ત્રિંશદ્વર્ષે બહુરાજસ્નેહો ભવતિ ॥ ૪૨॥

પત્રાદિલેખકઃ ॥ ૪૩॥

કુજર્ક્ષે નીલકુષ્ઠાદિરોગી ॥ ૪૪॥

શનિરાહુયુતે કેતુયુતે વાતશૂલાદિરોગી જ્ઞાતિશત્રુકલહઃ ॥ ૪૫॥

ભાવાધિપે બલયુતે જ્ઞાતિપ્રબલઃ ॥ ૪૬॥

અરિનીચર્ક્ષે જ્ઞાતિક્ષયઃ ॥ ૪૭॥

લગ્નાત્સપ્તમે બુધફલં

માતૃસૌખ્યં અશ્વાદ્યારૂઢો ધર્મજ્ઞઃ ઉદારમતિઃ ॥ ૪૮॥

દિગન્તવિશ્રુતિકીર્તિઃ રાજપૂજ્યઃ ॥ ૪૯॥

તત્રશુભયુતે ચતુર્વિંશતિવર્ષે આન્દોલિકાપ્રાપ્તિઃ ॥ ૫૦॥

કલત્રમતિઃ ॥ ૫૧॥

અભક્ષ્યભક્ષણઃ ॥ ૫૨॥

ભાવેશે બલયુતે એકદારવાન્ ॥ ૫૩॥

દારેશે દુર્બલે પાપે પાપર્ક્ષે કુજાદિયુતે કલત્રનાશઃ ॥ ૫૪॥

સ્ત્રીજાતકે પતિનાશઃ કલત્રં કુષ્ઠરોગી ॥ ૫૫॥

અરૂપવત્ ॥ ૫૬॥

લગ્નાદષ્ટમે બુધફલં

આયુકારકઃ બહુક્ષેત્રવાન્ ॥ ૫૭॥

સપ્તપુત્રવાન્ ॥ ૫૮॥

પઞ્ચવિંશતિવર્ષે અનેકપ્રતિષ્ઠાસિદ્ધિઃ ॥ ૫૯॥

કીર્તિપ્રસિદ્ધિઃ ॥ ૬૦॥

ભાવાધિપે બલયુતેપૂર્ણાયુઃ ॥ ૬૧॥

અરિનીચપાપયુતે અલ્પાયુઃ ॥ ૬૨॥

અથવા ઉચ્ચસ્વક્ષેત્રે વા શુભયુતે પૂર્ણાયુઃ ॥ ૬૩॥

લગ્નાન્નવમે બુધફલં

બહુપ્રજાસિદ્ધિઃ ॥ ૬૪॥

વેદશાસ્ત્રવિશારદઃ સઙ્ગીત પાઠકઃ દાક્ષિણ્યવાન્
ધાર્મિકઃ પ્રતાપવાન્ બહુલાભવાન્ પિતૃ દીર્ઘાયુઃ ॥ ૬૫॥

તપોધ્યાન-શીલવાન્ ॥ ૬૬॥

લગ્નાદ્દશમે બુધફલં

સત્કર્મસિદ્ધિઃ ધૈર્યવાન્ બહુલકીર્તિમાન્ બહુચિતવાન્ ॥ ૬૭॥

અષ્ટાવિંશતિવર્ષે નેત્રરોગવાન્ ॥ ૬૮॥

ઉચ્ચસ્વક્ષેત્રે ગુરુયુતેઽગ્નિષ્ટોમાદિ બહુકર્મવાન્ ॥ ૬૯॥

અરિપાપયુતે મૂઢકર્મવિઘ્નવાન્ દુષ્કૃતિઃ અનાચારઃ ॥ ૭૦॥

લગ્નાદેકાદશે બુધફલં

બહુમઙ્ગલપ્રદઃ ॥ ૭૧॥

અનેક પ્રકારેણ ધનવાન્ ॥ ૭૨॥

એકોનવિંશતિવર્ષાદુપરિ ક્ષેત્રપુત્રધનવાન્ દયાવાન્ ॥ ૭૩॥

પાપર્ક્ષે પાપયુતે હીનમૂલેન ધનલોપઃ ॥ ૭૪॥

ઉચ્ચસ્વક્ષેત્રે શુભમૂલેન ધનવાન્ ॥ ૭૫॥

લગ્નાદ્વ્દશે બુધફલં

જ્ઞાનવાન્ ॥ ૭૬॥

વિતરણશાલી ॥ ૭૭॥

પાપયુતે ચઞ્ચલઞ્ચિત્તઃ ॥ ૭૮॥

નૃપજનદ્વેષી ॥ ૭૯॥

શુભયુતેન ધર્મમૂલેન ધનવ્યયઃ ॥ ૮૦॥

વિદ્યાહીનઃ ॥ ૮૧॥

અત્ર તન્વાદિદ્વાદશભાવસ્થિત ગુરૂફલમાહ

તત્રાદૌ લગ્ને ગુરુફલં

સ્વક્ષેત્રે શબ્દશાસ્ત્રાધિકારી ॥ ૧॥

ત્રિવેદી બહુપુત્રવાન્ સુખી ચિરાયુઃ જ્ઞાનવાન્ ॥ ૨॥

ઉચ્ચે પુર્ણફલાનિ ॥ ૩॥

ષોડશવર્ષે મહારાજયોગઃ ॥ ૪॥

અરિનીચપાપાનાં ક્ષેત્રે પાપયુતે વા નીચકર્મવાન્ ॥ ૫॥

મનશ્ચલત્વવાન્ મધ્યાયુઃ પુત્રહીનઃ સ્વજનપરિત્યાગી
કૃતઘ્નઃ ગર્વિષ્ઠઃ બહુજનદ્વેષી સાઞ્ચરવાન્ પાપક્લેશભોગી ॥ ૬॥

લગ્નાદ્દ્વિતીયે ગુરુફલં

ધનવાન્ બુદ્ધિમાન્ ઇષ્ટભાષી ષોડશવર્ષે ધનધાન્યસમૃદ્ધિઃ
બહુપ્રાબલ્યવાન્ ઉચ્ચસ્વક્ષેત્રે ધનુષિ દ્રવ્યમાન્ ॥ ૭॥

પાપયુતે વિદ્યાવિઘ્નઃ ॥ ૮॥

ચોરવઞ્ચનવાન્ દુર્વચનઃ અનૃતપ્રિયઃ ॥ ૯॥

નીચક્ષેત્રે પાપયુતે મદ્યપાની ભ્રષ્ટઃ ॥ ૧૦॥

કુલનાશકઃ ॥ ૧૧॥

કલત્રાન્તરયુક્તઃ પુત્રહીનઃ ॥ ૧૨॥

લગ્નાત્તૃતીયે ગુરુફલં

અતિલુબ્ધઃ ભ્રાતૃવૃદ્ધિઃ દાક્ષિણ્યવાન્ સઙ્કુલ્પ સિદ્ધિકરઃ ॥ ૧૩॥

બન્ધુદોષકરઃ ॥ ૧૪॥

અષ્ટશત્રિન્દ્વર્ષે યાત્રાસિદ્ધિઃ ॥ ૧૫॥

ભાવાધિપે બલયુતે ભ્રાતૃદીર્ઘાયુઃ ॥ ૧૬॥

ભાવાધિપે પાપયુતે ભ્રાતૃનાશઃ ॥ ૧૭॥

ધૈર્યહીનઃ જડબુદ્ધિઃ દરિદ્રઃ ॥ ૧૮॥

લગ્નાચ્ચતુર્થે ગુરુફલં

સુખી ક્ષેત્રવાન્ બુદ્ધિમાન્ ક્ષીરસમૃદ્ધિઃ સન્મનાઃ મેધાવી ॥ ૧૯॥

ભાવાધિપે બલયુતે ભૃગુચન્દ્રયુક્તે શુભવર્ગેણ નરવાહનયોગઃ ॥ ૨૦॥

બહુક્ષેત્રઃ અશ્વવાહનયોગઃ ગૃહવિસ્તરવાન્ ॥ ૨૧॥

પાપયુતઃ પાપિનઃ દૃષ્ટવશાત્ ક્ષેત્રવાહનહીનઃ ॥ ૨૨॥

પરગૃહવાસઃ ક્ષેત્રહીનઃ માતૃનાશઃ બન્ધુદ્વેષી ॥ ૨૩॥

લગ્નાત્પઞ્ચમે ગુરુફલં

બુદ્ધિચાતુર્યવાન્ વિશાલેક્ષણઃ વાગ્મી પ્રતાપી અન્નદાનપ્રિયઃ
કુલપ્રિયઃ અષ્ટાદશવર્ષે રાજદ્વારેણ સેનાધિપત્ય યોગઃ ॥ ૨૪॥

પુત્રસમૃદ્ધિઃ ॥ ૨૫॥

ભાવાધિપે બલયુતે પાપક્ષેત્રે અરિનીચગે પુત્રનાશઃ ॥ ૨૬॥

એકપુત્રવાન્ ॥ ૨૭॥

ધનવાન્ ॥ ૨૮॥

રાજદ્વારે રાજમૂલેન ધનવ્યયઃ ॥ ૨૯॥

રાહુ-કેતુયુતે સર્પશાપાત્ સુતક્ષયઃ ॥ ૩૦॥

શુભદૃષ્ટે પરિહારઃ ॥ ૩૧॥

લગ્નાત્ષષ્ઠે ગુરુફલં

શત્રુક્ષયઃ જ્ઞાતિવૃદ્ધિઃ પૌત્રાદિદર્શનં વ્રણશરીરઃ
શુભયુતે રોગાભાવઃ ॥ ૩૨॥

પાપયુતે પાપક્ષેત્રે વાતશૈત્યાદિરોગઃ ॥ ૩૩॥

મન્દક્ષેત્રે રાહુયુતે મહારોગઃ ॥ ૩૪॥

લગ્નાત્સપ્તમે ગુરુફલં

વિદ્યા ધનેશઃ બહુલાભપ્રદઃ ચિન્તાધિકઃ
વિદ્યવાન્ પાતિવ્રત્ય ભક્તિયુત કલત્રઃ ॥ ૩૫॥

ભાવાધિપે બલહીને રાહુકેતુશનિકુજયુતે
પાપવીક્ષણાદ્વાકલત્રાન્તરમ્ ॥ ૩૬॥

શુભયુતે ઉચ્ચસ્વક્ષેત્રે એકદારવાન્ કલત્રદ્વારા
બહુવિત્તવાન્ સુખી ચતુસ્ત્રિમ્શદ્વર્ષે પ્રતિષ્ઠાસિદ્ધિઃ ॥ ૩૭॥

લગ્નાદષ્ટમે ગુરુફલં

અલ્પાયુઃ નીચકૃત્યકારી ॥ ૩૮॥

પાપયુતે પતિતઃ ॥ ૩૯॥

ભાવાધિપે શુભયુતે રન્ધ્રેદીર્ઘાયુઃ ॥ ૪૦॥

બલહીને અલ્પાયુઃ ॥ ૪૧॥

પાપયુતે સપ્તદશવર્ષાદુપરિ વિધવાસઙ્ગમો ભવતિ ॥ ૪૨॥

ઉચ્ચસ્વક્ષેત્રે દીર્ઘાયુઃ બલહીનઃ અરોગી યોગપૌરુષઃ
વિદ્વાન્ વેદશાસ્ત્રવિચક્ષણઃ ॥ ૪૩॥

લગ્નાન્નવમે ગુરુફલં

ધાર્મિકઃ ॥ ૪૪॥

તપસ્વી સાધુતારૂઢઃ ધનિકઃ પઞ્ચત્રિંશદ્યજ્ઞકર્તા
પિત્રુદીર્ઘાયુઃ સત્કર્મસિદ્ધિઃ અનેકપ્રતિષ્ઠાવાન્ બહુજનપાલકઃ ॥ ૪૫॥

લગ્નાદ્દશમે ગુરુફલં

ધાર્મિક શુભકર્મકારી ગીતાપાઠકઃ

યોગ્યતાવાન્ પ્રૌઢકીર્તિઃ બહુજનપૂજ્યઃ ॥ ૪૬॥

ભાવાધિપે બલયુતે વિશેષક્રતુસિદ્ધિઃ ॥ ૪૭॥

પાપયુતે પાપક્ષેત્રે કર્મવિઘ્નઃ ॥ ૪૮॥

દુષ્કૃતિયાત્રા લાભહીનઃ ॥ ૪૯॥

લગ્નાદેકાદશે ગુરુફલં

વિદ્વાન્ ધનવાન્ બહુલાભવાન્ દ્વાત્રિંશદ્વર્ષે અશ્વારૂઢઃ ॥ ૫૦॥

અનેક પ્રતિષ્ઠાસિદ્ધિઃ ॥ ૫૧॥

શુભપાપયુતે ગજલાભઃ ॥ ૫૨॥

ભાગ્યવૃદ્ધિઃ ચન્દ્રયુતે નિક્ષેપલાભઃ ॥ ૫૩॥

લગ્નાદ્દ્વાદશે ગુરુફલં

નિર્ધનઃ પઠિતઃ અલ્પપુત્રઃ ગણિતશાસ્ત્રજ્ઞઃ સમ્ભોગી ॥ ૫૪॥

ગ્રન્થિવ્રણી અયોગ્યઃ ॥ ૫૫॥

શુભયુતે ઉચ્ચસ્વક્ષેત્રે સ્વર્ગલોકપ્રાપ્તિઃ ॥ ૫૬॥

પાપયુતે પાપલોકપ્રાપ્તિઃ ॥ ૫૭॥

ધર્મમૂલેન ધનવ્યયઃ બ્રાહ્મણ સ્ત્રી સમ્ભોગી ગર્ભિણી સઙ્ગમી ॥ ૫૮॥

## અથ તન્વાદિદ્વાદશ ભાવસ્થિત ભૃગુફલમાહ

તત્રાદૌ લગ્ને ભૃગુફલં

ગણિતશાસ્ત્રજ્ઞઃ ॥ ૧॥

દીર્ઘાયુઃ દારપ્રિયઃ વસ્ત્રાલઙ્કારપ્રિયઃ રૂપલાવણ્યપ્રિયઃ ગુણવાન્ ॥ ૨॥

સ્ત્રીપ્રિયઃ ધનીવિદ્વાન્ ॥ ૩॥

શુભયુતે અનેક ભૂષણવાન્ ॥ ૪॥

સ્વર્ણકાન્તિદેહઃ ॥ ૫॥

પાપવીક્ષિતયુતે નીચાસ્તગતે ચોરવઞ્ચનવાન્ ॥ ૬॥

વાતશ્લેષ્માદિરોગવાન્ ॥ ૭॥

ભાવાધિપે રાહુયુતે બૃહ દ્વિદ્વિજો ભવતિ ॥ ૮॥

વાહને શુભયુતે ગજાન્તૈશ્વર્યવાન્ ॥ ૯॥

સ્વક્ષેત્રે મહારાજયોગઃ ॥ ૧૦॥

રન્ધરે ષષ્ઠાષ્ઠવ્યયાધિપેશુક્રે દુર્બલે સ્ત્રીદ્વયમ્ ॥ ૧૧॥

ચઞ્ચલભાગ્યઃ ॥ ૧૨॥

ક્રૂરબુદ્ધિઃ ॥ ૧૩॥

લગ્નાદ્દ્વિતીયે ભૃગુફલં

ધનવાન્ કુટુમ્બી સુભોજનઃ વિનયવાન્ ॥ ૧૪॥

નેત્રે વિલાસધનવાન્ સુમુખઃ ॥ ૧૫॥

ધાવાન્ પરોપકારી ॥ ૧૬॥

દ્વત્રિંષદ્વર્ષે ઉત્તમસ્ત્રીલાભઃ ॥ ૧૭॥

ભાવાધિપે દુર્બલઃ દુઃસ્થાને નેત્રવૈપરીત્યં ભવતિ ॥ ૧૮॥

શશિયુતે નિશાન્ધઃ કુટુમ્બહીનો નેત્રરોગી ધનનાશકરઃ ॥ ૧૯॥

લગ્નાત્તૃતીયે ભૃગુફલં

અતિલુબ્ધઃ દાક્ષિણ્યવાન્ ભ્રાતૃવૃદ્ધિઃ સઙ્કલ્પસિદ્ધિઃ
પશ્ચાત્ સહોદરાભાવઃ ॥ ૨૦॥

ક્રમેણ ભ્રાતૃતત્પરઃ વિત્તભોગપરઃ ॥ ૨૧॥

ભાવાધિપે બલયુતે ઉચ્ચસ્વક્ષેત્રે ભ્રાતૃવૃદ્ધિઃ
દુઃસ્થાને પાપયુતે ભ્રાતૃનાશઃ ॥ ૨૨॥

લગ્નાચ્ચતુર્થે ભૃગુફલં

શોભનવાન્ બુદ્ધિમાન્ ભ્રાતૃસૌખ્યં સુખી ક્ષમાવાન્ ॥ ૨૩॥

ત્રિંશદ્વર્ષે અશ્વવાહનપ્રાપ્તિઃ ॥ ૨૪॥

ક્ષીરસમૃદ્ધિઃ ભાવાધિપે બલયુતે
અશ્વાન્દોલિકાકનકચતુરઙ્ગાદિવૃદ્ધિઃ ॥ ૨૫॥

તત્રપાપયુતે પાપક્ષેત્રે અરિનીચગે બલહીને ક્ષેત્રવાહનહીનઃ ॥ ૨૬॥

માતૃક્લેશવાન્ ॥ ૨૭॥

કલત્રાન્તરભોગી ॥ ૨૮॥

લગ્નાત્પઞ્ચમે ભૃગુફલં

બુદ્ધિમાન્ મન્ત્રી સેનાપતિઃ ॥ ૨૯॥

માતામહી દૃષ્ટા યૌવનદાર પુત્રવાન્ ॥ ૩૦॥

રાજસન્માની મન્ત્રી સુજ્ઞઃ સ્ત્રીપ્રસન્નતાવૃદ્ધિઃ ॥ ૩૧॥

તત્રપાપયુતે પાપક્ષેત્રે અરિનીચગે બુદ્ધિજાડ્યયુતઃ પુત્રાશઃ ॥ ૩૨॥

તત્રશુભયુતે બુદ્ધિમાન્ નીતિમત્પુત્રસિદ્ધિઃ વાહનયોગઃ ॥ ૩૩॥

લગ્નાષષ્ઠે ભૃગુફલં

જ્ઞાતિપ્રજાસિદ્ધિ શત્રુક્ષયઃ પુત્રપૌત્રવાન્ ॥ ૩૪॥

અપાત્રવ્યયકારી માયાવાદી રોગવાન્ આર્યપુત્રવાન્ ॥ ૩૫॥

ભાવાધિપે બલયુતે શત્રુજ્ઞાતિર્દ્ધિઃ શત્રુપાપયુતે નીચસ્થે
ભાવેશેન્દુસ્થે શત્રુજ્ઞાતિનાશઃ ॥ ૩૬॥

લગ્નાત્સપ્તમે ભૃગુફલં

અતિકામુકઃ મુખચુમ્બકઃ ॥ ૩૭॥

અર્થવાન્ પરદારરતઃ વાહનવાન્ સકલકાર્યનિપુણઃ
સ્ત્રીદ્વેષી સત્પ્રધાન જનબન્ધુકલત્રઃ ॥ ૩૮॥

પાપયુતે શત્રુક્ષેત્રે અરિનીચગે કલત્રનાશઃ ॥ ૩૯॥

વિવાહદ્વયમ્ ॥ ૪૦॥

બહુપાપયુતે અનેકકલત્રાન્તર પ્રાપ્તિઃ ॥ ૪૧॥

પુત્રહીનઃ ॥ ૪૨॥

શુભયુતે ઉચ્ચે સ્વક્ષેત્રે તુલે કલત્રદેશે બહુવિત્તવાન્ ॥ ૪૩॥

કલત્રમૂલેન બહુપ્રાબલ્યયોગઃ સ્ત્રીગોષ્ઠિઃ ॥ ૪૪॥

લગ્નાદષ્ટમે ભૃગુફલં

સુખી ચતુર્થે વર્ષે માતૃગણ્ડઃ ॥ ૪૫ ॥

અર્ધાયુઃ રોગીહિતદારવાન્ અસન્તુષ્ટઃ ॥ ૪૬ ॥

શુભક્ષેત્રે પુર્ણાયુઃ ॥ ૪૭ ॥

તત્ર પાપયુતે અલ્પાયુઃ ॥ ૪૮ ॥

લગ્નાન્નવમે ભૃગુફલં

ધાર્મિકઃ તપસ્વી અનુષ્ઠાનપરઃ ॥ ૪૯ ॥

પાદેબહૂત્તમલક્ષણઃ ધર્મી ભોગવૃદ્ધિઃ સુતદારવાન્ ॥ ૫૦ ॥

પિતૃ દીર્ઘાયુઃ ॥ ૫૧ ॥

તત્ર પાપયુતે પિત્રરિષ્ટવાન્ ॥ ૫૨ ॥

પાપયુતે પાપક્ષેત્રે અરિનીચગે ધનહાનિઃ ॥ ૫૩ ॥

ગુરુદારગઃ ॥ ૫૪ ॥

શુભયુતે ભાગ્યવૃદ્ધિઃ ॥ ૫૫ ॥

મહારાજયોગઃ ॥ ૫૬ ॥

વાહનકામેશયુતે મહાભાગ્યવાન્ અશ્વાન્દોલ્યાદિ વાહનવાન્ ॥ ૫૭ ॥

વસ્ત્રાલઙ્કારપ્રિયઃ ॥ ૫૮ ॥

લગ્નાદ્દશમે ભૃગુફલં

બહુપ્રતાપવાન્ પાપયુતે કર્મવિઘ્નકરઃ
ગુરુબુધચન્દ્રયુતે અનેકવાહનારોહણવાન્ ॥ ૫૯ ॥

અનેકઋતુસિદ્ધિઃ ॥ ૬૦ ॥

દિગન્તવિશ્રુતકીર્તિઃ અનેકરાજયોગઃ બહુભાગ્યવાન્ વાચાલઃ ॥ ૬૧ ॥

લગ્નાદેકાદશે ભૃગુફલં

વિદ્વાન્ બહુધનવાન્ ભૂમિલાભવાન્ દયાવાન્ શુભયુતે
અનેક વાહનયોગઃ ॥ ૬૨ ॥

પાપયુતે પાપમૂલાદ્ધનલાભઃ ॥ ૬૩ ॥

શુભયુતે શુભમુલાત્ નીચર્ક્ષે પાપરન્ધ્રેશાદિ યોગે લાભહીનઃ ॥ ૬૪ ॥

લગ્નાદ્દ્વાદશે ભૃગુફલં

બહુલદારિદ્ર્યવાન્ ॥ ૬૫॥

પાપયુતે વિષયલુબ્ધપરઃ ॥ ૬૬॥

શુભયુક્તશ્ચેત્ બહુધનવાન્ ॥ ૬૭॥

શય્યાખટ્વાઙ્ગાદિસૌખ્યવાન્ શુભલોકપ્રાપ્તિઃ
પાપયુતે નરકપ્રાપ્તિઃ ॥ ૬૮॥

## અથ તન્વાદિદ્વાદશ ભાવસ્થિત શનિફલમાહ

તત્રાદૌ લગ્ને શનિફલં

વાતપિત્તદેહઃ ॥ ૧॥

ઉચ્ચે પુરગ્રામાધિપઃ ધનધાન્ય સમૃદ્ધિઃ ॥ ૨॥

સ્વર્ક્ષે પિતૃધનવાન્ ॥ ૩॥

વાહનેશકર્મેશક્ષેત્રે બહુભાગ્યમ્ ॥ ૪॥

મહારાજયોગઃ ॥ ૫॥

ચન્દ્રમસા દૃષ્ટે ભિક્ષુકી વૃત્તિઃ ॥ ૬॥

શુભદૃષ્ટે નિવૃત્તઃ ॥ ૭॥

લગ્નાદ્દ્વિતીયે શનિફલં

દ્રવ્યાભાવઃ દારદ્વયમ્ ॥ ૮॥

પાપયુતે દારવઞ્ચનામઠાધિપઃ અલ્પક્ષેત્રવાન્ નેત્રરોગી ॥ ૯॥

લગ્નાત્તૃતીયે શનિફલં

ભ્રાતૃહાનિકારકઃ ॥ ૧૦॥

અદૃષ્ટઃ દુર્વૃત્તઃ ॥ ૧૧॥

ઉચ્ચસ્વક્ષેત્રે ભ્રાતૃવૃદ્ધિઃ ॥ ૧૨॥

તત્રપાપયુતે ભ્રાતૃદ્વેષી ॥ ૧૩॥

લગ્નાચ્ચતુર્થે શનિફલં

માતૃહાનિઃ દ્વિમાતૃવાન્ ॥ ૧૪॥

સૌખ્યહાનિઃ નિર્ધનઃ ॥ ૧૫॥

ઉચ્ચસ્વક્ષેત્રે ન દોષઃ ॥ ૧૬॥

અશ્વાદિઆન્દોલાદ્યવરોહી ॥ ૧૭॥

લગ્નેશેમન્દે માતૃદીર્ઘયુઃ ॥ ૧૮॥

સૌખ્યવાન્ ॥ ૧૯॥

રન્ધ્રેશયુક્તે માત્રરિષ્ટમ્ ॥ ૨૦॥

સુખહાનિઃ ॥ ૨૧॥

લગ્નાત્પઞ્ચમે શનિફલં

પુત્રહીનઃ અતિદરિદ્રી દુર્વૃત્તઃ દત્તપુત્રી ॥ ૨૨॥

સ્વક્ષેત્રે સ્ત્રીપ્રજાસિદ્ધિઃ ॥ ૨૩॥

ગુરુદૃષ્ટે સ્ત્રીદ્વયમ્ ॥ ૨૪॥

તત્ર પ્રથમાઽપુત્રા દ્વિતીયા પુત્રવતી ॥ ૨૫॥

બલયુતે મન્દે સ્ત્રીભિર્યુક્તઃ ॥ ૨૬॥

લગ્નાત્ષષ્ઠે શનિફલં

અલ્પજ્ઞાતિઃ શત્રુક્ષયઃ ॥ ૨૭॥

ધનધાન્યસમૃદ્ધિઃ કુજયુતે દેશાન્તર સઞ્ચારી ॥ ૨૮॥

અલ્પરાજયોગઃ ॥ ૨૯॥

ભઙ્ગયોગાત્ક્વચિત્સૌખ્યક્વચિદ્યોગભઙ્ગઃ ॥ ૩૦॥

રન્ધ્રેશે મન્દે અરિષ્ટં વાતરોગી શૂલવ્રણદેહી ॥ ૩૧॥

લગ્નાત્સપ્તમે શનિફલં

શરીરદોષકરઃ કૃશકલત્રઃ વેશ્યાસમ્ભોગવાન્ અતિદુખીઃ
ઉચ્ચસ્વક્ષેત્રગતે અનેકસ્ત્રીસમ્ભોગી ॥ ૩૨॥

કેતુયુતે સ્ત્રીસમ્ભોગી ॥ ૩૩॥

કુજયુતે શિશ્નચુમ્બનપરઃ ॥ ૩૪॥

શુક્રયુતે ભગચુમ્બનપરઃ ॥ ૩૫॥

પરસ્ત્રીસમ્ભોગી ॥ ૩૬ ॥

લગ્નાદષ્ટમે શનિફલં

ત્રિપાદાયુઃ દરિદ્રી શૂદ્રસ્ત્રીરતઃ સેવકઃ ॥ ૩૭ ॥

ઉચ્ચસ્વક્ષેત્રે દીર્ઘાયુઃ ॥ ૩૮ ॥

અરિનીચગે ભાવાધિપે અલ્પાયુઃ ॥ ૩૯ ॥

કષ્ટાન્નભોગી ॥ ૪૦ ॥

લગ્નાન્નવમે શનિફલં

પતિતઃ જીર્ણોદ્ધારકરઃ એકોનચત્વારિંશદ્વર્ષે
તટાકગોપુરનિર્માણકર્ત્તા ॥ ૪૧ ॥

ઉચ્ચસ્વક્ષેત્રે પિતૃદીર્ઘાયુઃ ॥ ૪૨ ॥

પાપયુતે દુર્બલે પિત્રરિષ્ટવાન્ ॥ ૪૩ ॥

લગ્નાદ્દશમે શનિફલં

પઞ્ચવિંશતિવર્ષે ગઙ્ગાસ્નાની અતિલુબ્ધઃ પિત્તશરીરી ॥ ૪૪ ॥

પાપયુતે કર્મવિઘ્નકરઃ શુભયુતે કર્મસિદ્ધિઃ ॥ ૪૫ ॥

લગ્નાદેકાદશે શનિફલં

બહુધની વિઘ્નકરઃ ભૂમિલાભઃ રાજપૂજકઃ ॥ ૪૬ ॥

ઉચ્ચે સ્વક્ષેત્રે વા વિદ્વાન્ ॥ ૪૭ ॥

મહાભાગ્યયોગઃ બહુધની વાહનયોગઃ ॥ ૪૮ ॥

લગ્નાદ્દ્વાદશે શનિફલં

પતિતઃ વિકલાઙ્ગઃ ॥ ૪૯ ॥

પાપયુતે નેત્રચ્છેદઃ ॥ ૫૦ ॥

શુભયુતે સુખી સુનેત્રઃ પુણ્યલોકપ્રાપ્તિઃ ॥ ૫૧ ॥

પાપયુતે નરક પ્રાપ્તિઃ ॥ ૫૨ ॥

અપાત્રવ્યયકારી નિર્ધનઃ ॥ ૫૩ ॥

## અથ તન્વાદિદ્વાદશ ભાવસ્થિત રાહુકેત્વોઃ ફલમાહ

તત્રાદૌ લગ્ને રાહુકેત્વોઃ ફલં

મૃતપ્રસૂતિઃ ॥ ૧॥

મેષવૃષભકર્કરાશિસ્થે ધાવાન્ ॥ ૨॥

બહુભોગી ॥ ૩॥

અશુભે દૃષ્ટે મુખલાઞ્છની ॥ ૪॥

લગ્નાદ્દ્વિતીયે રાહુકેત્વોઃ ફલં

નિર્ધનઃ દેહવ્યાધિઃ પુત્રશોકઃ શ્યામવર્ણઃ ॥ ૫॥

પાપયુતે ચુબુકે લાઞ્છનમ્ ॥ ૬॥

લગ્નાત્તૃતીયે રાહુકેત્વોઃ ફલં

તિલનિષ્પાવમુદ્ગકોદ્રવસમૃદ્ધિવાન્ ॥ ૭॥

શુભયુતે કણ્ઠલાઞ્છનમ્ ॥ ૮॥

લગ્નાચ્ચતુર્થે રાહુકેતુફલં

બહુભૂષણસમૃદ્ધિઃ જાયાદ્વયં સેવકઃ
માતૃક્લેશઃ પાપયુતે નિશ્ચયેન ॥ ૯॥

શુભયુતદૃષ્ટે ન દોષઃ ॥ ૧૦॥

લગ્નાત્પઞ્ચમે રાહુકેત્વોઃ ફલં

પુત્રાભાવઃ સર્પશાપાત્ સુતક્ષયઃ ॥ ૧૧॥

નાગ પ્રતિષ્ઠયા પુત્રપ્રાપ્તિઃ ॥ ૧૨॥

પવનવ્યાધિઃ દુર્માર્ગી રાજકોપઃ દુષ્ટગ્રામવાસી ॥ ૧૩॥

લગ્નાત્ષષ્ઠે રાહુકેત્વોઃ ફલં

ધીરવાન્ અતિસુખી ॥ ૧૪॥

ઇન્દુયુતે રાજસ્ત્રીભોગી ॥ ૧૫॥

નિર્ધનઃ ચોરઃ ॥ ૧૬॥

લગ્નાત્સપ્તમે રાહુકેત્વોઃ ફલં

દારદ્વયં તન્મધ્યે પ્રથમસ્ત્રીનાશઃ

દ્વિતિયે કલત્રે ગુલ્મવ્યાધિઃ ॥ ૧૭॥

પાપયુતે ગણ્ડોત્પત્તિઃ ॥ ૧૮॥

શુભયુતે ગણ્ડનિવૃત્તિઃ ॥ ૧૯॥

નિયમેન દારદ્વયમ્ ॥ ૨૦॥

શુભયુતે એકમેવ ॥ ૨૧॥

લગ્નાદષ્ટમે રાહુકેત્વોઃ ફલં
અતિરોગી દ્વત્રિંશદ્વર્ષાયુષ્માન ॥ ૨૨॥

શુભયુતે પઞ્ચચત્વારિંશદ્વર્ષે ભાવાધિપે બલયુતે
સ્વોચ્ચે ષષ્ટિવર્ષાણિવા જીવિતમ્ ॥ ૨૩॥

લગ્નાન્નવમે રાહુકેત્વોઃ ફલં
પુત્રહીનઃ શૂદ્રસ્ત્રીસમ્ભોગી સેવકઃ ધર્મહીનઃ ॥ ૨૪॥

લગ્નાદ્દશમે રાહુકેત્વોઃ ફલં
વિતન્તુસઙ્ગમઃ ॥ ૨૫॥

દુર્ગ્રામવાસઃ ॥ ૨૬॥

શુભયુતે ન દોષઃ ॥ ૨૭॥

કાવ્યવ્યસનઃ ॥ ૨૮॥

લગ્નાદેકાદશે રાહુકેત્વોઃ ફલં
પુત્રૈઃ સમૃધ્દઃ ॥ ૨૯॥

ધનધાન્ય સમૃધ્દઃ ॥ ૩૦॥

લગ્નાદ્દ્વાદશે રાહુકેત્વોઃ ફલં
અલ્પપુત્રઃ ॥ ૩૧॥

નેત્રરોગી પાપગતિઃ ॥ ૩૨॥

ઇતિ ભૃગુસૂત્રાણિ સમાપ્તા ।

Encoded by Radu Canahai clradu at yahoo.com

Proofread by Radu Canahai, Pradeep Date

*bhRigu sUtram*

pdf was typeset on March 11, 2023

Please send corrections to *sanskrit@cheerful.com*